शोधज्योतिः
ISSN-2350-0700

# ज्योतिषदर्शनसूत्राणि

**अङ्कुर नागपालः**[1]

## सूत्राणि

१. कथ्यतेऽथाकथितम्। २. कालश्चिदचित्संश्लेषः। ३. गुणतारतम्याद् ग्रहात्मकः। ४. परविकृतिश्चापरो निग्रहानुग्रहकरः। ५. भोगदः कर्मादिष्टे सति। ६. प्रेरयिता दशास्विति। ७. एतद्व्यासः पाराशरे। ८. अथाज्ञश्चित्प्रेरितोऽन्यथा मुक्तः। ९. तदा स्वरूपावस्थानम्। १०. प्रत्यक्षानुमानसिद्धमिति। ११. निषिद्धान्निग्रहः। १२. तेन कालवश्यतामयाचिदभिनिवेशः। १३. विहितैरनुग्रहो मनःप्रसादः। १४. परापरयोर्वा भक्त्या च। १५. अपराऽल्पफलाऽचिरात्। १६. सुखं सद्यः किन्तु बन्धाय। १७. परमनल्पसुखमन्यया क्रमात्। १८. परो हि वरेण्यः श्रौतः। १९. विद्याविद्यासहयोगात्। २०. सम्प्रसादस्तेनाचिन्निवृत्तिरुत्कर्षश्च शनैः । २१. भ्रष्टे भक्तिरवित्री। २२. खल्वन्ते विज्ञानसिद्धिरन्तश्रुता। २३. विश्लेषोऽव्यवहितश्च। २४. एतदन्यदन्तवदेव एवेति।

## अथ श्रीरमानाम्नी स्वोपज्ञा सूत्रव्याख्या

**सहस्रशीर्षा श्रुतिवेद्यविग्रहः प्रचण्डभानूद्भवनो जगद्गुरुः ।**
**श्रियाऽन्वितो भृत्यहितैकचिन्तको जयत्यसौ यज्ञभुजां पतिर्हरिः॥**

अथ सर्वस्य प्राणिनो निखिलानिष्टनिवृत्त्यानन्दसिद्धिलक्षणं हितं चिन्तयन्नारायणोऽखिलगुरुर्निरुपद्रवेणानुग्रहेण सर्गादौ पुरुषार्थतत्सिद्ध्युपायबोधिनीं साङ्गवेदराशिमयत्नेन शश्वास। तत्रेष्टानिष्टप्राप्तिपरिहारोपायबोधको वेदश्चतुर्धा विभक्तो विष्णुज्ञानावतारेण महर्षिणा कृष्णद्वैपायनेनेति पुराणप्रसिद्धः। अशेषज्ञानराशिर्भेदद्वयेन परापरालक्षणेन विश्रुता श्रुतावपि "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च"[2] इत्यत्र। अपरा तु सविशेषाऽऽचार्यपरम्परया ज्ञेया साङ्गवेदात्मिका दशलक्षणी। परा त्वपरालक्षिता गुरुपरिचर्यादिकर्मिणां

---

[1] (M.A. University of Delhi, NET-JRF) 4/9-10, Vijay Nagar Double Storey, Delhi - 110009.

[2] मुण्डकोपनिषदि १.१.४

शुद्धचेतसामनुष्ठितस्ववर्णाश्रमोचितकर्तव्यानां सत्परम्परया लब्धाध्यारोपापवादलक्षणोपदेशानामथ श्रुतमहावाक्यानां मूलाविद्यानिरासद्वाराऽऽत्मतयाऽऽविर्भवति। तत्राद्याया ऋगादिवेदचतुष्टयं व्याकरणाद्यङ्गषट्कञ्चेति यावद्दशलक्षणानि; येष्वन्यतमं वेदचक्षुर्भूतं ज्योतिषमपि सूर्यपितामहव्यासादिभिः प्रचोदितं संवर्धितं किल कालक्रमात्। तत्तु ग्रहगत्यादिप्रतिपाद्यतया वेदाध्यायतदर्थानुष्ठानकालनिर्णायकत्वाद् हितदर्शि। तस्मान्निवृत्ताऽस्याशास्त्रत्वानुपपत्तिः। जातकगोळनिमित्तप्रश्नमुहूर्तगणिताख्याङ्गषट्कालङ्कृतस्य सच्छास्त्रस्य गणितादिषु प्रसिद्धेष्वपि लोकेऽस्य दर्शनपक्षोऽप्रसिद्धः। अतः समासतश्चतुर्विंशतिसूत्रैः प्रस्तूयतेऽत्र सः। तत्रादौ — कथ्यतेऽथाकथितम् (१)। अथेत्यानन्तर्ये प्रयुक्तः। द्विजाद्यधिकारसम्पत्तौ सति सदाचार्य्यसन्निधावधीत्य होरादिस्कन्धत्रयमेतानि सूत्राणि चिन्त्यानीत्यर्थः। कामार्थसाधकत्वे धर्मोपयोगि शास्त्रमेतदयं प्रसिद्धः सर्वत्र, परं मोक्षाख्येऽसंसारलक्षणे परमपुरुषार्थेऽस्य विनियोगः कथमित्यप्रसिद्धो विषयस्तस्मादकथितः। तमेवाकथितं लोकेऽप्रसिद्धमधुनाऽत्र कथ्यते समासतः प्रपञ्च्यते। निखिलोऽपि वेदार्थः समन्वितो भगवद्भिः श्रीशङ्कराचार्यपादैः; अतस्तस्यानुगमिदमपि चिन्तनमत्र प्रवृत्तम्। प्रतिज्ञातमन्तेऽपि — एतदन्यत्... इत्यत्र।

ज्योतिषं तु कालविचारपरं शास्त्रम्, अत आदौ कालो विचार्यते — कालश्चिदचित्संश्लेषः (२)। अहमर्थस्त्वनात्मसाक्षी सच्चिदानन्दस्वरूप आत्मैव चित्, तमतिरिच्य सर्वोऽनात्मैवाचित्; आत्मविरुद्धधर्मत्वात्। किन्तु मिथ्याज्ञाननिमित्तः सत्यानृत आत्मानात्मानौ मिथुनीकृत्य अहंताममतालक्षणो लोकव्यवहारः प्रवृत्तश्चिदचित्संश्लेषात्मकः। तच्च मिथ्याज्ञानमविद्यामायाप्रकृत्यादिभिः सञ्ज्ञितम्। मायाऽविद्या वाऽनादिकालाच्चितः संश्लिष्टेति वेदान्ताभिमतम्; "अविद्या तच्चितोर्योगः षडस्माकमनादयः"[१] इत्युक्तेः। अतोऽनादिकालान्मोक्षपर्यन्तं चिदचित्संश्लेषरूपाऽवधिरविद्याभिन्नः कालः; "कालो मायात्मसम्बन्धः"[२] इति सूतसंहितोक्तेः। स च सम्बन्धस्तु प्रातिभासिको बाधितत्वात्सति स्वरूपाधिगमे; किन्तु व्यवहारसिद्ध्यर्थमुपचरितः, न तु सिद्धान्ततः प्रमाणाभावात्। तथापि तद्वेदान्ताविरोधत्वमुपपादितं विस्तरात् सूतसंहिताभाष्ये श्रीविद्यारण्यचरणैः।

[१] अद्वैतसिद्धौ (दृष्टिसृष्ट्युपपत्त्याम्)

[२] सूतसंहितायाम् २.२.१०

अविद्यानिमित्तकेनाध्यासेन सर्वोऽपि प्राणी प्रवर्तते। "अध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः"[१] इत्याहुराचार्यभगवत्पादा अपि। तथैवाविद्यारूपकालनिमित्तैश्च संस्कारैर्जन्तूनां संसारभावोऽपि प्रवृत्तः। विशुद्धसत्त्वप्रकृतिबिम्बितचैतन्यम् ईश्वरः सर्वशास्ता सर्वलोकमहेश्वरश्च पञ्चदशीप्रसिद्धः। स एव सृष्टिस्थितिसंहृतिनिग्रहानुग्रहलक्षणं जगद्व्यापारं करोति भूतानां हितकाम्यया। भूतानां हितं तु पुरुषार्थसिद्धिरेव; "बुद्धीन्द्रियमनःप्राणान् जनानां असृजत् प्रभुः। मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च"[२] इति भागवतोक्तेः। तेषु च पञ्चस्वाद्यत्रयं स स्वयं पररूपो विशुद्धसत्त्वविग्रहोऽथ च निग्रहानुग्रहौ तु विभवतया मलिनसत्त्वमाश्रित्य सम्पादयति जगन्नाथः कालरूपी नवग्रहमुखेनापररूपेण; "जीवानां कर्मफलदो ग्रहरूपी जनार्दनः"[३] इति पराशरवचःप्रामाण्यात्। किन्तु जगत्सृष्टिस्थितिसंहृतिकर्तुः जगदीश्वरस्य स्वरूपस्तु विशुद्धसत्त्वमयः। ग्रहास्तु तद्विकृतयस्ततस्ते रजस्तमोमिश्रशुद्धसत्त्वमयविग्रहवन्तः। तेषु च भगवच्छक्तिरंशतो निग्रहानुग्रहरूपेणैव विद्यते, न तु पूर्णतया। पूर्णस्तु जगदीश्वर एव सृष्ट्यादिकृत्यपञ्चकनिर्वाहकः। अतो **गुणतारतम्याद् ग्रहात्मकः (३), परविकृतिश्चापरो निग्रहानुग्रहकरः (४)** इति सूत्रिते। गतिविशेषेण फलदातारो ग्रहणादन्वर्थग्रहसञ्ज्ञाः ग्रहास्तु नवैव प्रकृतिवैचित्र्यात्; "जीवसूर्येन्दवः सत्त्वं बुधशुक्रौ रजस्तथा। सूर्यपुत्रधरापुत्रौ तमःप्रकृतिकौ द्विज"[४] इति पराशरोक्तेः। अनुग्रहत्वं नाम मोक्षपर्यवसायित्वं, तदन्यथा निग्रहत्वञ्च।

ननु निग्रहानुग्रहयोर्हेतुः कः? उच्यते — **भोगदः कर्मादिष्टे सति (५)**। प्राणिनां पूर्वकर्मभिरादिष्टो नियोजितोऽनुशासितो वा कश्चिद् ग्रहो निग्रहानुग्रहौ भोगौ कर्मफलजन्यौ प्रभवतीत्यर्थः। तथा हि भगवान् गौतमोऽपि "पूर्वकृतफलानुबन्धात् तदुत्पत्तिः"[५], "ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्"[६] इति। स्वसिद्धान्ताविरुद्धत्वादनयोः सूत्रयोः परमततोऽतिदेश इति ज्ञेयः। अतस्तु कस्यचिदपि जीवस्य नवदेहप्राप्तिलक्षणे जन्मनि पूर्वकृतकर्मफलानुरोधेन कस्याञ्चिदपि स्थितौ नभसि स्थित्वा यावज्जीवनं

[१] ब्रह्मसूत्रशाङ्करभाष्ये १.१.१

[२] श्रीमद्भागवतमहापुराणे १०.८७.२

[३] बृहत्पाराशरहोराशास्त्रे २.३

[४] तत्रैव ३.२२

[५] न्यायदर्शने ४.२.२१

[६] तत्रैव ४.१.१९

भोगान् ददाति ग्रहरूपी नारायण एव। तर्हि किं जीवस्तु भोक्तैव? न; स कर्ताऽप्यस्ति, परं व्यवहारे; न तु परमार्थे, कर्तृत्वस्यान्तःकरणसापेक्षत्वात्। कर्तृत्वमिच्छामूलकम्। साऽन्तर्वर्तिनी पूर्वकर्मानुरोधेन ग्रहेणैवोदिता; "अन्तःप्रविष्टः शास्ता जनानाम्"[1] इति श्रुतेः, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया"[2] इति स्मृतेश्च समर्थनात्। कदा प्रेरयति? यतो ह्येकस्मिन्नेव क्षणे सर्वग्रहप्रवृत्तिविरोधप्रसङ्गात्। प्रकामम्; स्वदशास्वतः; "स्वां स्वां दशामुपगतास्तु फलप्रदाः स्युः"[3] इति वराहोक्तेः। अतोऽत्रापि सूत्रितम् — **प्रेरयिता दशास्विति (६)**। इति शब्दो विचारोपसंहारपरः। अस्तु; कथम्भूता प्रवृत्तिरेषामित्युक्ते — **एतद्व्यासः पाराशरे (७)**। एतस्याः व्यासो विस्तारः पाराशरे बृहत्पाराशरहोराशास्त्रे तदुपलक्षितेषु वराहादीनाञ्च ग्रन्थेष्वन्तरेषु प्रदर्शितस्तत्रैवाऽवलोक्यः।

ग्रहैर्गृहीतो जीवः कथम्भूतः? इत्युच्यते — **अथाज्ञश्चित्प्रेरितः संश्लेषात् (८)**। अथेत्यग्रिमविचारोपक्रमार्थकः। चिति ज्ञानिनि सति अज्ञो विस्मृतिस्वात्मस्वरूपः। जीवोऽविद्यासंश्लेषादध्यासपरम्परया प्रेरितः प्रवृत्त इत्यर्थः। तत्प्रवृत्तिश्चाविद्याकामकर्मनिमित्तिका बीजाङ्कुरन्यायेन भवति दृढतरा प्रतिक्षणम्। यावदयमविद्यासंश्लिष्टस्तावत् संसारशृङ्खलाबद्धः। तथा हि तत्त्वविवेके — "कुर्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते। नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते। व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम्"[4] इति। किन्तु ब्रह्मात्मैक्यज्ञानलक्षणेन स्वरूपसाक्षात्कारेण निवृत्तायामध्यासपरम्परायां विज्ञाते चात्मस्वरूपे स मुक्तो भवति; अनात्मानं विहायैकमात्रमात्मस्वरूपेऽवस्थितो भवतीत्यभिप्रायः। तथैवाऽऽहुः श्रीशुकाचार्याः — "मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः"[5] इति। अतः सूत्रितमत्रापि — **मुक्तः स्वरूपावस्थिते (९)**। (९)। स्वरूपावस्थाने किञ्च मानम्? इत्यपेक्षायामाह — **प्रत्यक्षानुमानसिद्धमिति (१०)**। प्रत्यक्षं नाम श्रुतिः, अनुमानं नाम स्मृतिः; ताभ्यां सिद्धं स्वरूपावस्थानम्। निवृत्ताविद्यानां स्थितिर्वर्णिता "ज्ञात्वा देवं

---

[1] तैत्तिरीयारण्यके ३.११.३

[2] श्रीमद्भगवद्गीतायाम् १८.६१

[3] बृहज्जातके ८.२३

[4] पञ्चदश्याम् १.३०

[5] श्रीमद्भागवतमहापुराणे २.१०.६

सर्वपाशापहानिः"[१], "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"[२], "तमेव ज्ञात्वा विद्वान् मृत्युमुखात् प्रमुच्यते"[३] इत्येवञ्जातीयकेषु श्रुतिषु; "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते"[४], "सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च"[५] इत्यादिषु स्मृतिषु च। उभयत्रापि स्वरूपविज्ञानाज्जनिमरणपरम्परानिमित्तानां कर्मणां निरासात्परम्परया संसारभावनिवृत्तिरुक्ता; सैव मुक्तिरिति ज्ञेयम्।

तत्कृते काऽस्ति इतिकर्तव्यता? इत्यत आह — आदौ सदाचारेण वर्णाश्रमोचितेन चित्तशुद्धिः। ततः तस्याः सति ज्ञानेऽधिकारः स्याद्येन निःश्रेयससिद्धिर्भविता। कर्मानुष्ठानेन शुद्धे सति मनस्यात्मदर्शनसुलभता। यथाऽऽहुर्भाष्यकाराः — "अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णानाश्रमांश्चोद्दिश्य विहितः, स देवादिस्थानप्राप्तिहेतुरपि सन्, ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः। शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते"[६] इति। अतोऽग्रे सूत्रिते — **निषिद्धान्निग्रहः (११), तेन कालवश्यतामयाचिदभिनिवेशः (१२)**। कर्म तु काम्यनिषिद्धनित्यनैमित्तिकप्रायश्चित्तोपासनाभेदाद् षड्-विधम्। निषिद्धं कर्म पापजनकत्वाद्वेदेषु प्रतिषिद्धभूतम्। तदविद्याकामकर्मसंस्कारान् दृढयति, यतो मुक्तौ बाधा। अतस्तदनुष्ठानेन निग्रहः संसारपर्यवसायिलक्षणः। काम्येन सुखलक्षणमल्पास्थिरफलम्; ततोऽप्यविद्याकामकर्मसंस्कारेषु दृढताऽथ च मुक्तौ बाधा। अतोऽत्र काम्यं तु निषिद्धोपलक्षितम्। तयोरनुष्ठानेन अचित्स्वानात्मपदार्थेषु आत्मबुद्धिरूपोऽभिनिवेशो जायते; यतः कालवश्यता संसारचक्रभ्रमणरूपा। परम् — **विहितैरनुग्रहो मनःप्रसादः (१३)**। विहितं नाम वेदेऽप्रतिषिद्धतया प्रतिपादितं विधेयं कर्म। तच्चतुर्विधं नित्यनैमित्तिकप्रायश्चित्तोपासनभेदात्। लक्षणान्येषां शास्त्रान्तरे प्रसिद्धानि। मनसः प्रसादो नाम तस्य शुद्धिरेव। मनस्त्वन्तःकरणस्य उपलक्षणम्। निष्कामबुद्ध्याऽनुष्ठिते

---

[१] श्वेताश्वतरोपनिषदि १.११

[२] मुण्डकोपनिषदि २.२.९

[३] नारदपरिव्राजकोपनिषदि ९.१

[४] श्रीमद्भगवद्गीतायाम् ८.१६

[५] तत्रैव १४.२

[६] गीताशाङ्करभाष्ये १.१

सति विहितकर्मणाऽनुग्रहो भवति मनःशुद्ध्याऽऽत्मदर्शनाधिकारलक्षणः। तथा हि — "संस्कृतं मन आत्मदर्शने करणम्"[१] इतिगीताभाष्योपन्यासात्।

उपासनाविषयेऽत्र कश्चिद्विशेषः — "उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि"[२] इति प्रसिद्धः किल। उपासना भक्तिरेव शास्त्रसमर्थितमखण्डचिन्तनलक्षणम्। तथा च; विशुद्धसत्त्वप्रकृतिबिम्बितचैतन्य ईश्वर एव सगुणब्रह्मत्वेन गृहीत इत्युक्तं किल। तस्य द्विधा प्रवृत्तिरुक्ता — साक्षात्परमेश्वरत्वेन जगत्सृष्टिस्थितिसंहृतिरूपा, ग्रहत्वेन प्राणिनिग्रहानुग्रहरूपा च। तत्र परमेश्वरविषयिणी उपासना तु पराभक्तिः, ग्रहविषयिणी त्वपरा। सूत्रितमेतदेव — **परापरयोर्वा भक्त्या च (१४)**। अत्रस्थस्य चकारस्य पूर्वसूत्रस्थेन मनःप्रसादशब्देन सहान्वयः। मनःप्रसादो द्वाभ्यामप्युपासनाभ्यां भवति। किन्त्वपरा तु काम्येऽन्तर्भवतीत्यवधार्यः। किमर्थम्? तद्विवृयते — **अपराऽल्पफलाऽचिरात् (१५), सुखं सद्यः किन्तु बन्धाय (१६), परमनल्पसुखमन्यया क्रमात् (१७)**। अपरा ग्रहविषयिणी यद्यप्यचिरात्फलदा, परं तस्याः प्रयोजने तु निग्रहनिवारणमनुग्रहप्राप्तिश्चैव स्तः। तद्यथा — "यस्य यश्च यदा दुःस्थः स तं यत्नेन पूजयेत्। एषां धात्रा वरो दत्तः पूजिताः पूजयिष्यथ"[३] इति पराशरोक्तिः। ग्रहाणां शास्त्रोपदिष्टैर्मन्त्रतन्त्रयन्त्रकवचवटिरत्नादिभिर्विविधैश्च प्रयोगैरुपासनाभिश्च पूर्वकृतपापजन्यो निग्रहो निवर्ततेऽथानुग्रहः पूर्वपुण्यफलको भवतीति दिक्। आभ्यामभ्युदयो भवति, किन्तु निःश्रेयसस्तु शङ्कित एव। अभ्युदयेऽपि सति इहलोकोत्कर्षपरलोकसुखोभोगलक्षणे गतस्य लोकेऽस्मिन् पुनरावृत्तिः स्मर्यते श्रीमद्गीताचार्यैः — "ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान्। ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[४] इति। अतो ग्रहोपासनाऽपरालक्षणा त्वल्पफला। यथाऽऽहुर्गीताचार्याः — "अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्"[५] तद्भवत्यल्पमेधसाम्"[५] इति। अतः संसारपर्यवसायित्वेन मोक्षापर्यवसायित्वेन च तेषां काम्येऽन्तर्भावः। अधमाधिकारिणां कृत उपयोगिनी सा ग्रहोपासना अचिरादिहजन्मन्येव फलप्रदा, किन्तु

[१] तत्रैव २.२१

[२] वेदान्तसारे १२

[३] बृहत्पाराशरहोराशास्त्रे ८४.२६

[४] श्रीमद्भगवद्गीतायाम् ९.२०-२१

[५] तत्रैव ७.२३

परोपासनयाऽस्मिन्नेव जन्मनि सिद्धिस्स्यान्न वेति वक्तुमशक्तो भगवांश्चतुर्मुखोऽपि। अत्र “बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते”[१] इति भगवद्वचः प्रमापकम्। तर्हि किमर्थं परोपासना कर्तव्या? उच्यते — अन्ते साऽनन्तसुखप्रदा परम्परयाऽसंसारभावे पर्यवसितत्वात्; अत एव।

ग्रहपरयोः क उपास्यः? इत्यत आह — **परो हि वरेण्यः श्रौतः (१८)**। श्रौतो नाम श्रुतिविषयः; “त्वां तु औपनिषदं पुरुषं पृच्छामि”[२] इतिवत्। स एव परः परमपुरुषो वेदप्रसिद्धो वरेण्य उपास्य इत्यर्थः। तर्हि अभ्युदयसिद्धिः कथम्? तेनैव; यतस्तस्याभ्युदयनिःश्रेयसफलदातृत्वं प्रसिद्धं सद्ग्रन्थेषु। ततोऽभ्युदयमभ्युदयार्थी लभते, मोक्षार्थी मोक्षमित्यनवद्यः। ग्रहोपासनयाऽभ्युदयसिद्धिरेव स्यान्न तु मोक्षसिद्धिः। परमत्रोभयमिति विशेषः। वस्तुतोऽत्र सिद्धान्तः — परमेश्वर एव ग्रहत्वेन अभ्युदयफलदाताऽपि। तद्यथा गीतायाम् — “स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हि तान्”[३] इति। अतो ग्रहत्वेन स एव सर्वानपि भोगान् प्रददाति, विनश्यति चानिष्टान्। किन्तु ग्रहोपासना त्वधमाधिकारिविषयिणी। पुनश्चोक्तं गीतायामपि — “कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः। तं तं नियममास्थाय प्रकृत्या नियताः स्वया”[४] इति। मध्यमास्तु भगवन्तमुपास्य ततो विगतप्रतिष्ठाप्राप्त्यर्थं भ्रष्टैश्वर्यप्राप्तिकामनया अप्राप्तैश्वर्यसिद्ध्यर्थमेवंविधं रूपम् अभ्युदयमिच्छति। किन्तूत्तमस्तु जीवब्रह्मात्मैक्यबोधलक्षणं मोक्षमेवेच्छति, तत्कृत एव यतते च। स एव ज्ञानी। तस्य कर्मानुष्ठानं तु चित्तशुद्ध्यर्थमेव; “योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये”[५] इतिस्मृतेः। अतो निष्कर्षः — “अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्”[६] इति न्यायात् — परमपुरुष एव वरेण्यो भजनीयो वा सर्वेषाम्।

एका उपासनैवापेक्षिताऽनुग्रहाय? न; तत्साकं नित्यादीन्यवशिष्टानि चतुर्विधानि विहितकर्माण्यपि अपेक्षितानि, यैश्च सम्यगनुग्रहो स्यादिति दिक्। यथोपन्यस्तं गीताशास्त्रेऽपि — “स्वे स्वे कर्मण्यभिरतः

---

[१] तत्रैव ७.१९

[२] बृहदारण्यकोपनिषदि ३.९.२६

[३] श्रीमद्भगवद्गीतायाम् ७.२२

[४] तत्रैव ७.२०

[५] तत्रैव ५.११

[६] श्रीमद्भागवतमहापुराणे २.३.१०

संसिद्धिं लभते नरः"[१], "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः"[२] इति। अत एवात्र सूत्रितम् — **विद्याविद्यासहयोगात् (१९)**। विद्या नाम उपासना, अविद्या तु कर्माणि स्ववर्णाश्रमोचितानि; "विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः। यस्तदेतदुभयं सहैकेन पुरुषेणानुष्ठेयं वेद तस्यैवं समुच्चयकारिण एकैकपुरुषार्थसम्बन्धः क्रमेण स्यात्"[३] इति ईशावास्यशाङ्करभाष्यदिशा। एते तु शास्त्रबोध्यान्येव; "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ"[४] इति गीतोक्तेः। आभ्यां किं स्यात्? इत्यत आह — **सम्प्रसादस्तेनाचिन्निवृत्तिरुत्कर्षः शनैः (२०)**। सम्प्रसादो नाम अन्तःकरणशुद्धिः। कर्मोपासनाभ्यां सम्प्रसादः। ताभ्याम् "अवश्यं भाविभावानां प्रतिकारो न शस्यते"[५], "यदभावि न तद्भावि भावि चेन्न तदन्यथा"[६] इति बुद्धिः प्रभवति। तदभ्यासादुत्कर्षः। उत्कर्ष एव अचिन्निवृत्तिः — आत्मनोऽचिद्भिः पदार्थैरसङ्गता जायत इत्याशयः। सति तस्यामन्तःशुद्धावयं बोधो जायते यन्नाहं भोक्ता कर्ता च। कर्तृत्वं तु जडभूतेऽहङ्कार आत्मबुद्धिजन्यम्, तथैव भोक्तृत्वमपि मनस्यात्मबुद्ध्या; आत्मानात्मानौ मिथुनीकृत्य कृतो व्यवहारोऽविद्यात्मक इति कथितं किल। शनैःशनैरस्याभ्यासाद् मुमुक्षुर्भवति जातको ब्रह्मात्मैक्यबोधेच्छुः। तथैवाऽऽह श्रुतिर्भगवती — "देहाभिमाने गलिते विज्ञाते परमात्मनि। यत्र यत्र मनो याति तत्र तत्र परं पदम्"[७] इति। कर्मोपासनाभ्यामचिराद् बोधसिद्धिर्जायते वा? न। अनेकजन्मपरम्पराजन्यानि अविद्याकामकर्माणि न निवर्तन्तेऽचिरात्; कदाचिदिह जन्मनि जन्मान्तरे वा। अतः शनैरिति कथितम्।

किं पुनर्जन्मान्तरे सत्यारम्भतोऽनुष्ठेयानि कर्मोपासनादीनि? नैव; पुनर्जन्मनि पूर्वसंस्कारानुरोधेन ग्रहाणां स्थितिस्तु मोक्षपर्यवसायि-योगावहा भवति। अवधेयानि चात्र "न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति। प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः। शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।

---

[१] श्रीमद्भगवद्गीतायाम् १८.४५

[२] तत्रैव १८.४६

[३] ईशावास्योपनिषदि ८ शाङ्करभाष्ये

[४] श्रीमद्भगवद्गीतायाम् १६.२४

[५] पञ्चदश्याम् ७.१५५

[६] तत्रैव ७.१६७

[७] पैङ्गलोपनिषदि ४.२७

अथवा योगिनामेव कुले भवति धीमताम्। एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्”[१] इति गीतावचांसि। अतस्तदा जातको विशुद्धचेता इहामुत्रफलभोगविरक्तश्च भवति। तत्र हेतुः — **भ्रष्टे भक्तिरवित्री (२१)**। अत्र भ्रष्टो नाम लब्धदेहान्तरः। पूर्वजन्मकृतभक्त्या कर्मपुरस्सरया उपासनया तदुत्कर्षोऽन्तःशुद्धिर्न शमयति; यथावत्तिष्ठतीत्यर्थः। तस्योपासना एव तमवति रक्षतीत्याशयः। तथैवाऽऽहुर्गीताचार्याः — “तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्। यतते च ततो भूयः संसिद्धौ कुरुनन्दन। पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः”[२] इति। अत्र पूर्वसंस्कारादिष्टा ग्रहस्थितिरेव हेतुर्या प्रतिपादिता जातकग्रन्थेषु महापुरुषप्रव्रज्यादियोगत्वेन। अनेकजन्मसु सत्सु साधनापरम्परायां पुष्टायां सति निवर्तन्तेऽविद्याकामकर्माणि, स्वरूपभूतज्ञानं चाविर्भवति; “अनेकजन्मसंसिद्धिस्ततो याति परां गतिम्”[३] गतिम्”[३] इतिगीतोक्तिप्रामाण्यात्। तदा स जातकः स्वसत्कर्मफलीभूते सति कस्यचित्तत्त्वदर्शिनः सद्गुरोः सद्गुरोः प्रपन्नो भवति, तन्मुखादेवाथ सम्प्रदायरीत्या महावाक्यं श्रुत्वा तन्मनननिदिध्यासपरायणो भवति। तथा हि तत्त्वविवेके — “सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः। प्राप्य तीरतरुच्छायां विश्राम्यन्ति यथासुखम्। उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः। पञ्चकोषविवेकेन लभन्ते निर्वृतिं पराम्”[४] पराम्”[४] इति।

ननु कः स गुरुः? लब्धोत्कर्षो कश्चिज्जीवः? नेदं वाच्यम्। पूर्वजन्मकृताभ्यासाद्यदाऽस्मिञ्जन्मनि ग्रहास्तु मोक्षपर्यवसायियोगेऽवस्थिता भवन्ति, तदा परमेश्वर एव जातकानुग्रहाय गुरुमूर्त्याऽऽविर्भवति इत्यागमराद्धान्तः। यथा “परिपक्वमला ये तानुत्सादनहेतुशक्तिपातेन। योजयति परे तत्त्वे स दीक्षयाऽऽचार्यमूर्तिस्थः” इति। तदुपदेशादेव ब्रह्माकारवृत्तिर्जायते, यस्यां स्थितौ स आत्मदर्शी उत्तमकोटिको भक्तो भवति। तदा तद्भक्तिस्तु “स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते”[५] इत्येवमाकारका। इयमेवोत्तमकोटिका भक्तिः कर्मोपासनाफलभूता चेतसि ज्ञानमुदेति। ततः कथ्यते — **खल्वन्ते विज्ञानसिद्धिरन्तश्श्रुता (२२)**। अन्तो वेदान्त एव। तत्र श्रुता प्रसिद्धा विज्ञानसिद्धिः खल्वसंशयं

---

[१] श्रीमद्भगवद्गीतायाम् ६.४०-४२

[२] तत्रैव ६.४३-४४

[३] तत्रैव ६.४५

[४] पञ्चदश्याम् १.३१-३२

[५] विवेकचूडामणौ ३१

भवत्येवान्तकाले मोक्षात्पूर्वक्षण इत्यर्थः। विज्ञानसिद्धिस्तु "योऽसावसौ पुरुषः सोऽहमस्मि"[१], "सच्चिदानन्दात्मकोऽहमजोऽहं परिपूर्णोऽहमस्मि"[२] इत्येवंरूपा; तस्यां सत्यां सकलेष्ववस्तुषु आत्मबुद्धिः क्षीयते। तदा "नाहं देहो जन्ममृत्यू कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो मे। नाहं चेतः शोकमोहौ कुतो मे नाहं कर्ता बन्धमोक्षौ कुतो मे"[३] इति वचोबोध्या "आनन्दबुद्धिपूर्णस्य मम दुःखं कथं भवेत्। न मे बन्धो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः। मायामात्रविकासत्वान्मायातीतोऽहमद्वयः। आत्मानमञ्जसा वेद्मि क्वाप्यज्ञानं पलायितम्। कर्तृत्वमपि मे नष्टं कर्तव्यं वापि न क्वचित्। ब्राह्मण्यं कुलगोत्रे च नामसौन्दर्यजातयः। स्थूलदेहगता ह्येते स्थूलाद्भिन्नस्य मे न हि। क्षुत्पिपासान्ध्यबाधिर्यकामक्रोधादयोऽखिलाः। लिङ्गदेहगता ह्येते ह्यलिङ्गस्य न विद्यते। जडत्वप्रियमोदत्वधर्माः कारणदेहगाः। न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः। चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम। आनन्दत्वान्न मे दुःखमज्ञानाद्भाति सत्यवत्"[४] इत्येवमपि च स्थितिरुदेति। जाते सति ब्रह्मात्मैक्यबोधे मायात्मविश्लेषलक्षणो मोक्षो भवति — **विश्लेषोऽव्यवहितश्च** (२३)। अव्यवहितस्तात्कालिक इत्यर्थः। नूनं "कालस्त्वविद्यैव"[५] इतिसिद्धान्तबिन्दूक्तिः। निवृत्तायां सत्यविद्यायां सत्यविद्यायां को ग्रहः को गृहीतो वेतिरूपं सर्वस्य प्रपञ्चस्योपशमं भवति। इदमेव ज्योतिषस्य प्रयोजनम्। ग्रहाणां पूर्वसंस्कारजन्यादुःस्थितेः प्राणिनां निग्रहो दुःखोपलब्धिः। ततस्तदपघातके जिज्ञासा। तत्कृते सदाचारानुसन्धानम्। तेन चित्तशुद्धिस्ततो विज्ञानसिद्धिः। तदा मोक्षः कालाख्यमायात्मसम्बन्धनिवृत्त्या। अधुनोपसंह्रियते विचारः — **एतदन्यदन्तवदेव एवेति** (२४)। एतदन्यत्सर्वं यदत्र नोक्तं, तत् शाङ्करवेदान्तवदेव ज्ञेयम्। एवकारद्वित्वं प्रबन्धसमाप्त्यर्थम् ॥

## सन्दर्भग्रन्थसूचिः

१. गिरि महेशानन्द (१९९७), सिद्धान्तबिन्दुः, महेश अनुसन्धान केन्द्र (वाराणसी)

---

[१] ईशावास्योपनिषदि १६

[२] त्रिपाद्विभूतिमहानारायणोपनिषदि ८

[३] सर्वसारोपनिषदि ६

[४] आत्मबोधोपनिषदि

[५] सिद्धान्तबिन्दौ ८

२. गिरि स्वयम्प्रकाश (१९९९), सूतसंहिता (तात्पर्यदीपिका), महेश अनुसन्धान केन्द्र (वाराणसी)

३. झा सीताराम (२००१), बृहज्जातकम्, ज्योतिष प्रकाशन (वाराणसी)

४. पणशीकर वासुदेव लक्ष्मण (२०१०), ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा विद्याभवन (वाराणसी)

५. पाठक चित्तनारायण (२०१२), न्यायदर्शनम्, चौखम्बा विद्याभवन (वाराणसी)

६. फडके बाबाशास्त्री (२००८), तैत्तिरीयारण्यकम् (सायणभाष्यम्), आनन्दाश्रम (पूणे)

७. ब्रह्मचारी लक्ष्मणचैतन्य (१९९२), पञ्चदशी, धर्मसंघ-शिक्षामण्डल (वाराणसी)

८. मुनिलाल (२०१३), विवेकचूडामणि, गीताप्रेस (गोरखपुर)

९. रामेश्वरदत्त ब्रह्मचारी (२००४), अद्वैतसिद्धिः, चौखम्बा संस्कृत सीरिज़ ओफ़िस (वाराणसी)

१०. शर्मा पद्मनाभ (२०१२), बृहत्पाराशरहोराशास्त्रम्, चौखम्बा सुरभारती प्रकाशन (दिल्ली)

११. शास्त्री रामतेज (१९९३), श्रीमद्भागवतम्, चौखम्बा संस्कृत प्रतिष्ठान (दिल्ली)

१२. शुक्ल बदरीनाथ (२०१९), वेदान्तसारः, मोतीलाल बनारसीदास (दिल्ली)

१३. सरस्वती सच्चिदानन्देन्द्र (२०१५), श्रीमद्भगवद्गीता (श्रीशाङ्करभाष्यसमेता), अध्यात्म प्रकाश कार्यालय (होळेनरसिंहपुर)

१४. सरस्वती सत्यानन्द (२०१६), ब्रह्मसूत्रशाङ्करभाष्यम्, चौखम्बा संस्कृत प्रतिष्ठान (दिल्ली)